त्रैवर्णिकमणि नोजपतिपश्चायुक्तं मातरं गृहीष्यामीतिशपथं करोति। तथा अपोग्यएवभूद्रादिर्योग्यकर्माध्ययन
नादिकरोति। तथा अयोग्यएवभूद्रादिर्योग्यकर्माध्ययनादिकरोति। वृक्षावल्लीवर्द्धः क्षुद्रपशवोजाद्यः ते
षांपुंस्त्वस्यप्रजननशक्तेर्विनाशकः। वृक्षक्षुद्रपशूनामितिपाठेहिंग्वाद्यौषधप्रयोगेणावृक्षादः फलपुष्पनो
नांपातापितासासाधारणद्रव्यस्यवंचकः। दासीगर्भस्यपातिपिता। येचपित्रादयोअपतिताएवसंतः अन्योन्यंत्य
जंतितेसर्वेप्रत्यकंपाणशतंदंडार्हाभवंति॥ इतिसाहसप्रकरणं साहसप्रसंगात्तत्सदृशापराधेषुतेजकादानो
दंडमाह। वसानस्त्रीन्याणान्दद्यान्नेजकस्तुपरंमुक्। विक्रयावक्रयाधानपाचितेषुपाणदशनिजकोवस्त्र
स्यधावकः सपदिनिमेजनार्थंसमर्पितानिवासांसिस्वयमाच्छादयतितदासौपाणत्रयंदद्यः पुनः स्तादि
विक्रीणीतेअवक्रयंवाकरोतिएतावत्कालमुपयोगार्थंवस्त्रंदीयतेमह्यंचयुष्माभिरेतावद्धनंदेयमितिएवं
नाटकंपाददातिआधित्वंवानपतिस्वहृद्रोवापाचितंददातिअसौप्रत्यपराधंदशपाणंदंडनीयः तानिवस्त्रा
ण्यस्यशाल्मलफकेशालनीपानिनपाषाणेननव्यत्पासनरपानिनचस्वगृहेवासपितव्यानरतस्यादंडा
शाल्मलफलकेशेणनिड्याहासंसिनेजकः नचवासांसिवासांसिनिर्हरेन्नचवासयेदिति। मनुस्मरणं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

त्। पदापुनस्तानिपुमा दान्नाशयतितदानारदोक्तद्रष्टव्यं। मूलाष्टभागोहीयेतेसक्रद्धौतस्यवासस्तः द्विपाद
स्त्रिसतीयांचतुर्द्धौतेर्द्धमेवच। अर्द्धहानयांतुपरतः पादीशावचपक्रमात्। एवदशाणदशंजीर्णेजीर्णस्यानियम
दसपइति। अष्टपाणक्रीतस्यसक्रद्धौतस्यवस्त्रस्यनाशितस्यअष्टमभागोनंसप्रपाणमूल्यंदेयं। द्विर्धौतस्यतुप
दोनंषाणद्वयोनंत्रिर्द्धौतस्यतुपुनस्तृतीयांशन्यूनंचतुर्धौतस्यार्धंपाणचतुष्टयंदेयं। ततः परंप्रतिनिर्मोजनंपाद
पचयेनावशिष्टंमूल्यंदेयं। यावज्जीर्णेजीर्णस्यपुनर्नाशितस्यइच्छातोमूल्यदानं। पितापुत्राविरोधेतुसाक्षिणा
त्रिपाणेदमः अंतरेचतयोर्यः स्यातस्याप्यष्टगुणोदमः। सपौणववादेपाणदानेप्रतिनृपतिर्भवतिअसौचकारात्तपोयः कलहंव
र्वयतिसोपित्रिपाणदष्टगुणंचतुर्विंशतिपाणान्दंडनीयः दंपत्यादिक्षयमेवदंडानुसरणीयः। तुलाशासनमानानांकूट
कृतानांकस्यचा एतन्निश्चयमवहर्त्तायसदाप्यादंडमुत्तमं। तुलातोलनदंडः। शासनंपूर्वोक्तो। मानपुस्तुद्रोणादि। नाणि
कंमुद्राचिह्नितं द्रम्मनिष्कादिएतेषांयः कूटकृत्। देशप्रसिद्धपरिमाणदन्यथान्यूनत्वमाधिक्यंवा द्रम्मादेरप्यव्यव
हारिकमुद्रितत्वंवाताम्रादिगर्भत्वंवाकरोतियश्चैतैः कुटैः जीवनमपिव्यवहरतितावुभौप्रत्येकमुत्तमसाहसंदंडनी

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

यै। नाणकपरीक्षिणं प्रत्याह॥ अकूटं कूटकं कृते कूटं पश्चाप्यकूटकं। सानाणकपरीक्षा तु द्रव्यमुत्तमसाहसं। पपुनना
णकपरीक्षीता मादिगन्नमेव द्रम्मादिकं सम्यगीतिवृत्ते सम्यं चेवाकूटकमिति असावुत्तमसाहसं दंडः चिकित्सकं
प्रत्याह॥ त्रिषड्भिर्व्याचरन्प्राप्तस्तिर्यक्षु प्रथमं दमं। मानुषेमध्यमं राजमानुषेवुत्तमं दमं॥ यः पुनस्त्रिषड्भिर्व्या
आपूर्वं दानत्रिज्ञएवर्जावनार्थं चिकित्सितज्ञो हमितिर्यङ्मनुष्यराजपुरुषेषु चिकित्सामचरति असौ यथाक्रमं
प्रथममध्यमोत्तमसाहसं दंडनीयः। तत्रापि तिर्यगादिषु मूल्यविशेषेण धर्मविशेषेण वार्तविशेषेण राजपुरु
सत्रिविशेषेण दंडस्य गुरुलघुत्वं कल्पनीयः। अचर्ध्यं पश्चविद्धातिवध्यं पश्चपुमुंचति। अप्राप्तव्यवहारं च
सदाप्योदममुत्तमं। यः पुनर्वधिनानर्हमनपराधिनं राजाज्ञयाविना वध्नाति पश्चवध्यं व्यवहारार्थमाहूतमनिव
तव्यवहारं चोत्सृजत्यसावुत्तमसाहसं दाप्यः। मानेनतुलया वापि यो शमष्टमकं हरेत् दंडं सदाप्यो द्विशतं व
द्वौ हानौ च कल्पितं। यः पुनर्वीक्रयाद्विकापि सादेः पण्यस्याष्टमभंशं कूटमानेन कूटतुलया न्यूनया वोपहरति
असौ पणानां द्विशतं दंडनीयः। अपहृतस्य पुनर्द्रव्यस्य द्वौ हानौ च दंडस्यापि वहिर्हानौ कल्प्ये॥ नेषजस्ने

१४५

१४४॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

हलवाणगंधधान्यगुडादिषुपुष्पेषुप्रक्षेपन्हानंपापाण्डाप्यस्तकेषोडशभेषजमौषधद्रव्यंस्नेहो घृतादिर्बोधद्रव्यमुशीरादि॥आदिशब्दा
हिंगुमरीचादि। एतेष्वसारद्रव्यंविक्रयार्थंमिश्रपतःषोडसपाणोदंडः किंच। मद्यचर्म्मणिसूत्रायः कार्ष्टवल्कलदाससंग्रजातौजातिकरणे
विक्रयाष्टगुणेदमः। नविदेतवहमूल्याजातिर्यस्मिन्मद्यमीदिकेतदजातितास्मिन्नजातिकरणेविक्रयार्थंगंधवर्णसांतरसेवारणेनवहमू र
ल्यजातीयसादृश्यसंपादनेयथामल्लिकामोदसंचारणेनमल्लिकायाः सुगंधामलकमितिमार्जारचर्मणिवोणोत्कर्षापादनेनव्याघ्रचर्म
५गु तिस्फटिकमौणवाणितरकरणेनपद्मरागइतिकार्यासिकेसूत्रौणोत्कर्षाधाननेपट्टसूत्रमिति। कार्ष्णोपसेवोणोत्कर्षाधाननेनरजतमितिवि
ल्वेकाष्टेचंदनामोदसंचारणेनचंदनमितिकक्कोलत्वगास्वंलवंगमितिकार्यासिकेवासासिगुणोत्कर्षाधाननेनकौशेयमितिविक्रेय
स्यापादितस्यादृश्यस्यमद्यमीदेःपाणस्याषगुणेदंडोवेदितव्यः। सगुडपरिवर्त्तचसरत्नांडंचकृत्रिमं। आधानेविक्रयंवापिनयतोदं
डकल्पना॥ हानेपाणेतुपंचाशत्पाणात्तुशतमुच्यते। द्विपाणेद्विशतोदंडोमूल्यवृद्धेचवर्द्धमानासुद्रंपिधानंमुद्रनसहवर्त्ततइतिसमुद्रक
रंडकंपरिवर्त्तनाव्यत्यासःषोन्यदेवमुक्तानांपूर्णकरंडकंदर्शयित्वाहस्तलाघवेनान्यदेवस्फटिकानांपूर्णकरंडकंसमर्पयतिय
श्चसारत्नांडंकस्तूरिकादिकंकृत्रिमंकृत्वाविक्रयमधिवानपतितस्यदंडकल्पवक्ष्यमाणोवेदितव्यःकृत्रिमकस्तूरिकादेमूल्य
भूतेपाणेहानेन्यूनेन्यूनपाणमूल्यइतिपावत्तास्मिन्नकृत्रिमेविक्रीतेपंचाशत्पणोदंडः पाणमूल्येपुनःशतं। द्विपाणमूल्येद्विशतदं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

दुष्टत्वेवमूल्यवृद्धौ दंडवृद्धिरुन्नेपा। वणिजः प्रत्याहः संभूय दुर्वतामर्घसवाधंकरुशिल्पिनां। अर्धस्य द्वासंवृद्धिं वाजानंतो दमभुत्तमं।
राजनिस्तपितार्घस्य द्वासंवृद्धिवाजानंतोपिवाणिजः संभूयमिलित्वाकारुणांरजकादीनांशिल्पिनांचित्रकारादीनांसवाधनंपीड
करंअर्घांतरंलाभंलाभंकुर्वतः पाणसह स्वदंडनीयाः। किंच। संभूयवणिजंपाण्यमनर्घेणोपसंघतंविक्रीणंतावाविहितोदंडउत्त
मसाहसः। पेपुनर्वणिजोमिलित्वादेशांतरादागतंपाण्यमनर्घेणगृहीनमूल्येनप्रार्थयमानाउपरंधयंतिमहार्घेणवाविक्रीणंतेतेष
मत्तमसादसोदंडोविहितोमन्वादिभिः। केनपुनरर्घेणपाणितव्यमित्यतआह। राज्ञानिस्थापितोयोर्घः प्रत्यहंतेनविक्रयः क्रयोवा।
निश्रवोस्तस्माद्वणिजांलाभक्षस्मृतः। राजानिसंनिहितेसतिपरस्तेनार्घः स्थाप्यतेनिरूप्यतेतेनार्घेणप्रतिदिनंक्रयोवाकार्यः विक्र
योवानिर्गतः श्रवोनिश्रवोविशेषस्तस्माद्राजानिरूपितार्घा[illegible]द्वोनिश्रवः सएववणिजांलाभकारीनपुनः स्वछंदपरिकल्पित
रमनुनावार्घकरणेविशेषोदर्शितः। पंचरात्रेपंचरात्रेपक्षेमासेतथागतोकुर्वतश्चैषांप्रत्यक्षमर्घसंस्थापनेनपदुति। किंच। स्व
देशपाप्तेतुशतंवणिक्गृहीतपंचकं। दशकंपारदेशेयः सघक्रयविक्रयी। यः स्वदेशप्राप्तंपाण्यंगृहीत्वायोविक्रीणंतेतेभ्यसौपंचकं
शतंपाणशतेपंचकंलाभंगृह्णीयात्। प्रदेशात्पुनः प्राप्तंपाण्येपाणवाममूल्येदपार्णिलाभंगृह्णीयात्। यस्यपाण्यस्यगृहणंदिवसएव
विक्रयः संपद्यतेयः पुनः कालांतरेविक्रीणंतेतस्यकालोत्कर्षवशाल्लाभोत्कर्षः कल्प्यः एवंचपयार्घेनिरूपितेपाणशतेपंचपा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

लाभो भवति तथैवार्घो राज्ञास्वदेशपाण्यविक्रयेस्थापनीयः पारदेशपण्यविक्रयेऽर्घो निरूपणप्रकारमाह। पण्यस्योप
रिसंस्थाप्यव्ययपण्यसमुदयोऽर्घानुग्रहकार्यः क्रेतुर्विक्रेतुरेव च। देशांतरादागतेपण्ये देशांतरगमनप्रत्यागमनचोड
रहाणमुल्कादिरक्षनेपावानुपयुक्तोऽर्थस्तत्वंतमर्थपरिगणाप्यपण्यमूल्येनसहमेलयित्वापयापणशतेदशपणोलाभः स
पघतेः तथाक्रेरविक्रेत्रोरनुग्रहकार्यघोराज्ञास्थापनीयः प्रासंगिकंपरिसमाप्याधिकेनाविक्रीयासंप्रदानंप्रक्रमतेतत्स्वस
पंनारदेनाभिहितं। विक्रीयपण्यंमूल्येनक्रेतुर्पन्नप्रदीयतेविक्रीयासंप्रदानंतद्विवादपदमुच्यतइति। तत्रविक्रेयस्यद्रव्य
स्यचराचरभेदेनद्वैविध्यमभिधायः पुनः षड्विधत्वंतेनैवप्रत्यपादिलोकेस्मिन्द्विविधंपाणिडगमेस्थावरंतथा। षड्विधस
स्यतुबुधैर्दानादानविधिस्मृतः गणिमंतुलिमंमेयंरूपान्रूपतः प्रमेयेति। गणिमंक्रमुकफलादितुलिमंकुंकुमादिमेयंशाल्य
दिक्रियपादोहादिरूपायलक्षितंअतश्चमहिष्यादिरूपतः पाषागनादिश्रियादीद्यामरकतपद्मरागादीत्येतत्षड्विध
स्यापिपण्यविक्रीयासंप्रयच्छतोदंडमाह। गृहीतमूल्यंपतापंक्रतुर्नैवप्रयच्छति। सोदपंतस्यदाप्योसौदिग्लाभंचादिगामते। गृही
तमूल्यंपस्यविक्रेतातन्। गृहीतमूल्यंतघीदिविक्रेतापार्थयमानायस्वदेशवाणिजेक्रेतेनसमर्पयतितद्रूपाण्यथादिक्रयकाल
वहयादिमूल्यंतत्कालांतरेऽल्यमूल्येनैवलभ्यतेतदार्घहासकृतायः ऊदयोवृद्धिः पण्यस्यस्थावरजंगमात्मकस्यतेन

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

सहितंपाण्यंविक्रेताक्रेत्रेदापनीयः। यदामूल्यह्रासकृतः पाण्यस्यादयोनास्तिकिंतुक्रयकालेयावदेवेयतोमूल्यस्येयत्याण्यि
तिप्रतिपन्नेतावदेवतदातत्पाण्यमादायतस्मिन्देशेविक्रीणगेतस्ययोन्नाक्षस्तेनादयोनसहितंद्विकंत्रिकंइत्यादिप्रतिप
दितव्यद्विस्तुपादयेनवासहितंक्रेत्रेकेरवांछावशादापनीयः॥ यथाहनारदः। अर्घश्चेदवहार्येतसोदयंपाण्यमावहेत्।
स्थानिनामेवनियमोदिग्लाभंदिग्विचारिणमितिपदात्वर्घमहत्वेनपाण्यस्यन्यूनभावस्तदातस्मिन्पाण्येवस्वग्रहादि
केपउपभोगस्तदाच्छादनसुरवनिवसनादिरूपोविक्रेतुः तत्सहितंपाण्यमसौदाप्यः। यथाहनारदः विक्रीयपाण्यंमूल्येन
यःक्रेतुर्नप्रयच्छति। स्थावरस्यक्षयंदाप्योजंगमस्यक्रियाफलमितिविक्रेतुरुपभोगक्षयउच्यते। क्रेतःसंबंधित्वेन
क्षणेयमाणत्वाच्चपुनःकुड्यपातसस्यच्छातादिरूपः। तस्यतुउपहन्यितवापाण्यंदद्यातापहिपेतवविक्रेतुरेवसानेवे
विक्रीयासंप्रयच्छतइत्यत्रोक्तत्वात्। यथात्वसौक्रेतादेशांतरात्पाण्यंगृहाणार्थमागतस्तदातत्पाण्यमादायदेशांतरेविक्री
नस्ययोन्नाक्षस्तेनसहितंपाण्यंविक्रेताक्रेत्रेदापयितव्यः। अयंचक्रतपाण्यसमर्पणेनियमोनुशयाच्चेद्रष्टव्यः स
तित्वनुशयेक्रात्वाविक्रीयवाकिंचिदित्यादिमनूक्तंद्रष्टव्यं॥ किंच॥ विक्रीतमपिविक्रेयंपूर्वक्रेतर्यगृहानि। ह

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

निश्चेत्क्रयदोषेण क्रेतुरेव हिंसा न भवेत्। यदा पुनः सानुशयः क्रेता पापेन नाभिलष्यति तदा विक्रीतमपि पापेन मन्यत्र विक्र
यं। यदा पुनर्विक्रेत्रा दीयमाने क्रेता न गृह्णाति तच्छ्रपापेन राजदैविकेनापहृतं तदा क्रेतुरेव सैव हानिर्न्न वेत्यपापेन गृहणरूपे
ण क्रयदोषेण नासितत्वात्। अपि च। राजदैवोपघातेन पापेन दोषमुपागते। हानिर्विक्रेतुरेव सैव। धाचितस्यापि प्रयच्छत
यदा पुनः क्रेत्रा प्रार्थ्यमानमपि पापं विक्रेता न समर्पयत्यज्ञातानुशयः। पितच्छ्रराजदैविकेनापहृतं न भवति तदा हानिर्वि
क्रेतुरेव भवति। न्यादुष्टपापविनिष्टसहस्रं क्रेतृदपं विच। अन्यहस्ते च विक्रीतं क्रीणीते सदोषं वा पापेन प्रच्छादितदो
षं विक्रीणीते तदा तत्पापमूल्याद्द्विगुणं वा दुष्टवद्यादि। विक्रीणीते दमस्तत्र मूल्यान्न द्विगुणो न वेत्यपुनर्विनैवानुश
यमेकस्य हस्ते विक्रीतं पुनरन्यस्य हस्ते विक्रीणीते सदोषं वा पापेन प्रच्छादितदोषं विक्रीणीते तदा तत्पापमूल्यादिगुणे
दमो वेदितव्यः नारदेनापि विरोधो दर्शितः। अन्यहस्ते तु विक्रीय यो न्यस्मै तत्प्रयच्छति द्रव्यं तद्द्विगुणं दाप्यो विनयं ताव
देव तु। निर्दोषं दर्शयित्वा तु सदोषं यः प्रयच्छति। समूल्याद्द्विगुणं दाप्यो विनयं ताव देव त्विति सर्वस्वापविधिर्दत्तमूल्येपापे
द्रव्यः। अदत्तमूल्ये वाऽत्र क्रयक्रेतृविक्रेतृनियमकरणः समपादत्तेप्रदत्तौ निवृत्तौ वानकश्चिद्दोषः। यथाह नारदः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

दत्तमूल्यस्यपापस्यविधिरेषः प्रकीर्तितः। अदत्तेन्यत्रसमयान्नाविक्रेतुरविक्रयइति। विक्रयानुशयो निहितः क्री
तानुशयस्वरूपंप्रकृप्रपचितमधकनातदत्तपसाधारणं धर्ममाह॥ क्षयंवृद्धिंचवाणिज्यापापानामविजानता। कृत्वा
ननुशयकार्यः कुर्वन्नच्छुणदंडकः। परक्षितंक्रीतपापानोक्रयोत्तरकालंक्रयकालतोपरिमाणितार्घकृतांवृद्धिमपश्यताक्री
त्रानुशयोनकार्यः। विक्रेत्रेचमहार्घनिबंधनंपापक्षयमपश्यतानानुशयितव्यं। वृद्धिक्षयपरिज्ञानेपुनर्क्रेतरविक्रेत्रोरनुश
योन्नवतीतिव्यतिरेकादुक्तंभवति। अनुशयकालावधिश्चनारदेनोक्तः क्रीत्वामूलेनयः पुण्यंदुष्कृतंमन्यतेक्रयी। विक्रेतुः
प्रतिदेयंतत्रास्मिन्नेवान्यविक्षतं। द्विताद्विदलकेतामूल्यात्रिरांशमाहवेतद्विगुणंलुचितोपेद्विपरतक्रेतुरेवतदितिअपरीक्षतत्व
पविषयेपुनः पापवैगुण्यपरिबंधनानुशयावधिः दशैकपंचसप्ताहमासअहार्धमासिकमित्यादिना दर्शितमेवातदन
पावाचोयुक्त्यावृद्धिक्षयपरिज्ञानस्यानुशयकरणत्वमवगम्यते। यथापापपरीक्षाविधिवलात्पापदोषाणामतः पापदो
षतावृद्धिक्षयकारणत्रितयान्नावेनुशयकालाच्यांतरेपियच्चनुशयंकरोतितदापापवद्भागंदंडनीयः। अनुशयकाला
रणसद्भावेप्यनुत्पपकालातिक्रमेणानुशयंकुर्वतोऽपम्येवदंडः। उपनागेनाविनस्वैरेषुस्थिरार्घेष्वनुशयद

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

लातिक्रमेणानुशयं कुर्वतोमनुक्तो दंडो द्रष्टव्यः। परेण तु दशाहस्य न दद्यान्नापि दापयेत्। आददानो दद्यैव राज्ञा दंडः। यातानि
डिति॥ इति विक्रीयासंप्रदानं नाम प्रकरणं॥ संभूय समुत्थानं नाम विवादपदमिदानीं निदर्शयति॥ समवायेन वणिजो लाभार्थं
कर्म कुर्वतां॥ लाभलाभौ यथाद्रव्यं पयावासं विदाकृतौ सर्वेषामिदं कर्म मिलिताः कुर्महे इत्येवं रूपां संप्रतिपत्तिः समवायस्तेन ये
वणिजो नर्तकप्रभृतयो लाभलिप्सवो भूत्वा प्रतिपत्तिं कृत्वा कर्म कुर्वते तेषां लाभालाभावुपचयापचयौ यथाद्रव्यं येन पावदूनं पणापगृह
णार्थं दत्तं तदनुसारेण वस्त्रौ॥ यद्रूपं धनगुणभावपर्यालोचनया अस्य भागाद्रूपमस्यैको भाग इत्येवं रूपया संविदा समयेन यथा
संप्रतिपत्तेर्यथावेदितव्यौ। किंच प्रतिषिद्धमनादिष्टं प्रमादाद्यद्भक्षणं नाशितं। सतद्दधाद्दुग्धवाह्वरसितादशमांशं नाकृतेषां संभूय प्रच
रतां मध्ये पणमिदमित्थं न व्यवहर्तव्यमिति निषिद्धमाचरतां तावन्नाशितं अनादिष्टमननुज्ञानं वा कुर्वाणेन तथा प्रमादेन
प्रज्ञाहीनतया वा येन यन्नाशितं स तत्पणं वणिग्भ्यो दद्यात् यत्पुनस्तेषां मध्ये चौरराजादिजनिता दुःसनात्पणं पालपाति
तस्माद्दुःसितात्पादशमं मे संलभ्यो। अर्धप्रक्षेपार्थं द्विगुणं भागाभुल्कं न्यपोहरेत्। व्यासिद्धं राजयोग्यं च विक्रीतं राजगामि तत्। इत्य
तः पापस्येदं मूल्यमित्यर्धप्रक्षेपणं पदार्थानि न्यूनाणि हेतोरसौ मूल्याद्दिसंतितमं भागं मुल्कार्थं गृह्णीयात्। यत्पुनर्व्यासिद्धमन्यत्र न
विक्रेयमिति राज्ञा प्रतिषिद्धं पद्यराजयोग्यं मणिमाणिक्यादि प्रतिषिद्धमपि तद्राज्ञो ऽनिवेद्य लाभलाभेन विक्री

CC-0. Dharmartha Institute. Digitized by Arya Samaj Foundation Chennai and eGangotri. Vaidika Bhandara Initiative

तं चेद्राद्धगामि मूल्यदाननिरपेक्षं तत्सर्वं पापं राजा यहरेदित्यर्थः मिथ्यावदन्यरमाणं मुल्कास्थानादपाक्रमन्। दण्डस्तु
गुणपश्चाद्व्याजरूपविक्रयं यः पुनर्वणिक् मुल्कं वंचनार्थं पण्यपरिमाणं निन्हुते मुल्कं गृह्णन्स्थानाद्वापसरति पश्चात्स्पष्टमस्य
वादृत्येवं विवादास्पदं चूतं पापं क्रयाणां तिविक्रयाणां तेवातेसर्वं पापा दण्डगुणं दंडनीयः। अपि च तरिकः स्थलजं मुल्कं गृह्ण
न्दाप्यः पणान्दश। दाशाग्रामप्रतिवेशपानामेतदेव निमंत्रणं। मुल्कं हि द्विविधं स्थलजं जलजं चेत्र स्थलजमर्घप्रक्षेपणा
द्दिशं भागं मुल्कं नृपो हरेदित्यत्रोक्तं। जलजं तु मानवेनिहितं। पणं पानतरे दाप्यं पुरुषार्धं पणं तरे। पादं पशुश्च योषिच्च
पादार्धं च कः पुमान्। नौडुपानां निपानानां तीर्थं दाप्यानि सारतारिकं। नौडानि पल्लिं चित्यमांश्च परिछदा इति। मुल्कद
ण्डे परो विशेषः। नाचिन्नकार्षापणमस्ति मुल्कं नसित्यवचौ न शिशौ न दूते न तैक्ष्यलक्षे न दूतावसेषे न श्रोत्रिये प्रव
जिते न यज्ञ इति तीर्थितेऽनेनेति तरिः नवादिस्तडुन्यं मुल्कोधिकृतस्तरिकः सपदि स्थलो द्रवं मुल्कं गृह्णाति तदा दशपणं
दंडनीयः। वेशावेशमप्रतिवेश इति स्वविशमानिमुरवेस्वावेशमपार्श्वस्थं चोच्यते तत्र नवाप्रतिवेशयः दाशाग्रामाश्चेतप्रा
तिवेशपाश्च ब्राह्मणप्रातिवेशपास्तेषां श्रुतवन्तसंपन्नानां श्राद्धादिषु विनवेसत्यनिमंत्रणं एतदेव दशपणात्मदंडं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

वेदितव्यं। देशांतरमृतवणिक्कुरिक्थप्रत्याह। देशांतरमृतेप्रेतद्रव्यंदायदबांधवाः। ज्ञातयोबांधवरेफस्तद्गतास्तैर्विनान्यः पादसंन्यूय
कारिणांमध्येयः कश्चिद्देशांतरेगतोमतस्तद्दायंदायादापुत्राद्यपत्यवर्गाः बांधवामातृपक्षामातुलाद्याः ज्ञातयोपत्यवर्गव्यतिरि
क्ताः सपिंडावाआगताः संन्यूयव्यवहारिणोपदेशांतरादागतास्तेवाग्रहीपुत्रैर्विनादायादाद्याभवराजागृह्णीयात्। वाशब्देन
चदायादबांधवादीनांवैकल्यिकमधिकारंदर्शयति। पौर्वापर्यनियमस्तुपत्नीदुहितरइत्यादिप्रतिपादितएवात्रापिविज्ञे
यः शिष्यसब्रह्मचारिब्राह्मणनिषेधोवणिक्प्राप्तिश्चवचनप्रयोजनंवणिग्रामेपिमध्येयः पिंडदानाम्नदानादिसमर्थः
सगृह्णीयात्सामर्थ्यविशेषः पुनः सर्ववणिग्भिः संस्थितिनः सर्ववणिग्भिः। विभक्तपगृह्णीयुः तेषमप्यभावेदशवर्षंदायादादा
गमनंप्रतीक्ष्यानागतेषुराजास्वयंमवगृह्णीयात्। तदिदंनारदस्यष्टमुक्तं। एकस्यचेत्स्यान्मरणंदायादास्यतदाप्रयात्। अ
न्योवासतिदायादेशक्तश्चेत्सर्वएवते। तद्भावेनगुप्तंतत्कारयेद्दशवत्सरान्। अस्वामिकमदायादंदशवर्षंस्थितंततः
राजातदात्मसात्कुर्यादेवंधर्मोनहीयतइतिकिंचाजिह्मंत्यजेपुर्निलोभ्यामशक्तोन्यैनकारयेत्। जिह्मवंचकः तांनिलोभ्य
निर्गतत्वाभंलाभमाछिद्यत्यजेपुर्वाहिकार्यः पश्चसंन्यूयकारिणांमध्येभ्यांडप्रत्यवेक्षणादिकंकर्तुमसमर्थः अ[illegible]

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नस्वकंकर्म नंडनारवहनेतदायव्ययपरीक्षणादिकंकारयेत्प्रागुपदिष्टवणिक्धर्मस्तत्विगादिष्वतिदिशति। अने
नविधिराख्यातदित्विक्कर्षकर्मिणा। अनेननलाङ्गलाङ्गनोपयोदेव्यमित्यादिवणिग्धर्मकथनेनसत्विजांहोत्रा
दीनांक्लृप्तवडानांनटनर्तकतक्षादीनांवशिष्टकर्मोपडाविनांचविधिर्वर्तनप्रकारआख्यातस्तत्रदेत्विजां
धनविभागेविशेषोमनुनादर्शितः। सर्वेषामर्द्धिनोमुख्यास्तदर्धनार्धिनोपरे। तृतीयनस्तृतीयांशाश्चतुर्थांशाश्चपादिनः।
इति। अस्यायमर्थः। ज्योतिष्टोमेतशतेनदक्षस्येतीतिवचनेनगवांशतमत्विगानतिनूपदक्षिणाकार्यविनियुक्तंसत्वि
जश्चहोत्रादयः षोडशतत्रकियानंशइत्यपेक्षायामिदमुच्यते। सर्वेषांहोत्रादीनांषोडशर्त्विजांमध्येपेमुख्याश्च
त्वारोहोत्राध्वर्युब्रह्माउद्गातारःतेगोशतस्यार्द्धिनः सर्वेषांभागपरिपूरणेपपत्तिवशायाताश्चत्वारिंशदुपार्द्धिना।
र्द्धभाजः अपरेमैत्रावरुणप्रतिप्रस्थातारस्तदर्धनतस्यमुख्यांशस्यार्द्धिनचतुर्विंशतिरूपं
णार्धभाजः येचुनस्तृतीयेनाच्छावाकनेष्टाग्नीध्रप्रतिहर्तारस्तेतत्तृतीयेनामुख्यांशस्यषोडशांशानूपतृतीयांशेनतत्त
यांशेनतत्तीयांशभाजः। पेतुपादिनोग्रावस्तुदुन्नेरसुब्रह्मणपास्तेमुख्यभागस्यपञ्चतुर्थांशाद्वादशांशानूपस्तुद्वाजः न

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नुक्थमपमंशनियमोपघटतेनतावदत्रसमवायः नापिद्रव्यसमवायः नापिवचनंपद्दशादागनिपमः स्यत्रअतः समस्य
दम्भुतित्वादित्रिन्यायेनसर्वेषांसन्यांशत्वात्कर्मानुरूपेणवांसमाह्वामितियुक्तं। अत्रोच्यते। ज्येष्ठाविशेषप्रकृतिकेद्व
दशाहेऽर्धिनस्वतायिनः पादिन इतिसिद्धवदनुवादानघटतेपदितत्प्रकृतिभूतेज्येष्ठाविशेषेअर्धचतुर्थांश
भाक्कर्मेत्रावस्त्रणदानंनस्यात्। अतोवैदिकार्थपुरुतिसमाख्याबलात्पूर्वांशनियमोवकल्पतइतिनिरवद्यं॥ ॥इ
तिसत्रूपसमुत्थानप्रकरणं॥ इदानीं स्तेयंप्रसूयते। तल्लक्षणंचमनुनान्निहितंस्यात्साहसंत्वन्यपवत्पुसत्रंकर्मयत्प्र
तं। निरन्वयंभवेत्स्तेयंकृत्वापव्ययतेचयदिति। अन्वयपर्वद्रव्यरक्षिराजाध्यक्ष्यादिसमक्षंपुसत्रंबलावष्टंभेनयत्परधन
हरणादिकंक्रियतेतत्साहसंस्तेयंतुतद्विलक्षणंनिरन्वयं द्रव्यस्वाम्याद्यसमक्षंचापित्वापत्परधनहरणंतदुच्यते। प
त्रसान्वयमपिकृत्वानमपेदंकृतमितिभयान्निह्नुतेतदपिस्तेयंनारदेनाप्युक्तं। उपायैर्विविधैस्तेषांछलापित्वापकर्ष
णं। सुप्तमत्तप्रमत्तेभ्यः स्तेयमाहुर्मनीषिण इति। तत्रतस्करग्रहणंपूर्वकत्वादंडस्यग्रहणस्यचज्ञानपूर्वकत्वात्ज्ञा
नोपायंतावदाह। ग्राहकैर्गृह्यतेचोरोलोप्त्रेणाथपदेनवा। पूर्वकर्मापराधाच्चतयावाभुद्धवासक्तः पश्चोरइतिजैनैर्विरच

CC-0 Dharmartha Trust J&K. An eSangotri-Vaidika Bharata Initiative

प्यतेऽसौ ग्राहकैराजपुरुषैः स्थानपालपुरुषैः निर्गृहीतव्यः तत्रोत्पहृतभाजनादिनावा चौर्यविन्हेनवा नाशदेशा
दारभ्यः चौरपदानुसरणेन वा ग्राह्यः। यश्च पूर्वकर्मापराधी प्राकख्यातचौर्यः अशुद्धः प्रज्ञातावासः स्थानं यस्यासौ च
शुद्धवासकः सोपि ग्राह्यः। किंच अन्येपि शंकया ग्रह्य ज्ञातिनामादिनिन्हवैः द्यूतस्त्रीपानसक्ताश्च मुष्णन्निन्नमुखस्वराः प
रद्रव्यग्रहणं च पृच्छकागूढचारिणः निरापव्यवपतं च विनष्टद्रव्यविक्रयाः न केवलं पूर्वोक्ता ग्राह्याः किंत्वन्येपि वक्ष्यमा
णैर्लिंगैः शंकया ग्राह्याः ज्ञातिनिन्हवेन नाहं शूद्र इति एवं नृपेण नाम निन्हवेन नाहं नृपेण इत्येवं नृपेण आदिग्रहणा
त्स्वदेशग्रामकुलाद्यपत्यापेन चलं सिता ग्राह्याः द्यूतपण्यांगनामद्यपानादिव्यसनेष्वतिप्रसक्ततया कृतस्यासित्व
मिति चौरग्राहिभिः पृष्ठ्वा पदिमुष्णमुखस्वरावान्निन्नस्वरावान्नवतितदाद्यसावपि ग्राह्यः वहवचनात्खिन्नललाटादीनां ग्रहणं तथापे
निष्कारणं कंचनं किं पदस्य धनं किं वा गृहमित्येवं पृच्छंतिवेषांतरधारणेनात्मनं गूहंतिपलापे चरंतिपेवा आपान्नावेपि वद्रव्यप
कारिणः पेवा विनष्टद्रव्याणां डीर्णि वास्त्रान्निन्ना भाजनादीनामज्ञातस्वामिकानां विक्रयकारकास्ते सर्वे चौर्यसंभावनया
ग्राह्याः एवं नानाविधतत्त्वचौरस्यापि लापादिचौर्यलिंगसंबंधसंभवता यथाह नारदः। अन्यहस्तात्परिभ्रष्टमका

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मादुच्छितं भविवैरेणवापुतिक्षिप्तं लोपुंयन्नात्परीक्षपेत्। तथा। असत्याः सत्यसंकाशाः सत्याश्चासत्यसन्निभाः। दृश्यते विधाम
वास्तस्माद्धर्मपरीक्षणमिति। एवं चौर्यशंकपाग्रहीतेनात्माणधनीयदुत्पाह। ग्रहीतशंकया चौर्येनात्मानं चेद्विशो धयेत्। दापयि
त्वा हृतं द्रव्यं चोरदंडेन दंडयेत्। यदि चौर्यशंकया ग्रहीतस्तन्निराकरणार्थमात्मानं न शो धयेत् तर्हि वक्ष्यमाणं धनदापनवधादिदंड
नाकं भवेद तो मानुषेणतद भवेद दिव्येन वात्माशो धनीयः ननु नाहं चोर इति मिथ्यातरकथं प्रमाणं संभवति तस्याभावानुपत्वात् उच्य
ते। दिव्यस्य तावद्भावाभावगोचरत्वं रुच्यावान्यतरः कुर्यादित्यत्र प्रतिपादितं मानुषं पुनर्यद्यपि साक्षाद्भिमिथ्यान्तरेन संभवति तथा
पि कारणसंस्रवेन भावनुपमिथ्याकरणसाधनमुखेन भावमपि गोचरयेत्यवाप्यथानाशापहारकालेहं देशांतरस्थ इत्यभिप्रायेण भवि
ते चौर्यो भावस्याप्यर्थात्सिद्धेः मुद्धिर्भवत्येव। चोरदंडमाह॥ वीरंपूहाप्यापहृतं घातयेद्विविधैर्वधैः पस्तुप्रागुपपरीक्षयातन्नि
रपेक्षं वानिश्चितचौर्यस्तं स्वामिनेऽपहृतधनं स्वरूपेणमूल्यकल्पनया वादापयित्वा विविधैर्वधैर्घातयेत् एतच्चोत्तमसाहसदंड।
प्राप्तिपोग्योत्तमद्रव्यविषयं न पुनः पुष्पवस्त्रादिक्षुद्रमध्यमद्रव्यापहारव्यवपं। साहसेषु पएवा कृच्छ्रेषु दंडोमनीषिभिः। सएवदं
दंडस्तेपि द्रव्येषु त्रिष्वपि क्रमादिति नारदवचनेपि च धरूपस्योत्तमसाहसस्योत्तमद्रव्यविषयेव्यवस्थापितत्वात्। पत्युनर्वद्ध
मनुवचनं। अन्यायोपात्तवित्तत्वाद्धनमेषामलात्मकं। अतस्तान्न घातयेद्दुजानार्थ दंडेन दंडयेदिति तदपि महापराधविषयं॥

CC-0 Dharmartha Trust J&K. An eGangotri-Valdika Bharata Initiative

चौरविशेषेऽपवादमाह॥ सचिन्हं वा ब्राह्मणं कृत्वा स्वराष्ट्रात्प्रवासयेत्। ब्राह्मणं पुनश्चौरं महत्यप्यपराधेन घातयेत्। अपि तु ल
ल्लाटे कपित्वा स्वदेशान्निर्वासयेत्। अकनं चश्वपदाकारं कार्यं। तथा चमनुः। गुरुतल्पे भगः कार्यः। सुरापाने सुराध्वजः। स्तेये च श्वप
दं कार्यं वह्नहन्यशिराः युमानिति। एतच्च दंडोत्तरकालं प्रायश्चित्तमचिकीर्षितं द्रष्टव्यं। यथाह मनुः। प्रायश्चित्तं तु कुर्वाणाः पूर्वव
त्स्यायथोदितं। नांकयारोङ्गालललाटे तु दाप्यास्तु तमसा हस्तमिति चौरादर्शने ऽपहृतद्रव्यप्राप्त्युपायमाह॥ हृतितेपहृते दोषो ग्राम
भर्तुरनिर्गते विवात भर्तुस्तत्पथि चोरोऽङ्गुरवीतके। पादग्रामे मध्ये मनुष्यादिप्राणिवधो धनापहरणं वा जायते तदा ग्रामपते
रेव चौरोपेक्षा दोषः अतस्तत्परिहारार्थं स एव चौरं गृहीत्वा राज्ञे समर्पयेत्। तदशक्तौ अहृतं धनं धनिने दद्यात्। यदि चौरपदं च
ग्रामान्निर्गतं न दर्शयति दर्शितं पुनस्तत्पदं पत्रप्रविशति तद्विषयाधिपतिरेव चौरं धनं वर्ष्यपेत्। तथा च नारदः। गोवरयस्य
मुख्येन तेन चौरः प्रयत्नतः ग्राह्यो दाप्यो यथा शोषं पदं दर्शितं निर्गतं। निर्गते पुनरेतस्मान्नवेदन्यत्र पातितं। सामंतान्मार्गपालांश्च
दिक्पालांश्चैव दापयेदिति विवाते वपहारे विवीतस्वामिन एव दोषः पदात्वध्वत्यतध्वतं भवति विवातके वा विवीतादन्यत्र दे
त्रे तदा चौरोऽङ्गुर्मार्गपालस्य दिक्पालस्य वापराधः। किंच। स्वसीमित्रं दद्याद्ग्रामस्तत्पदं वा पत्रागच्छति। यं च यामो वहिः क्रो
शाद्ग्रामस्य यथा वा पुनः पदा पुनर्ग्रामाद्बहिः सीमापर्यंते स्थे त्रे मोषादिकं भवति तदा तद्ग्रामवासिन एव दद्युः यदि सीम्नो वाह

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

चौरपदं ननिर्गतं निर्गते पुनर्पत्रग्रामादिके चौरपदं प्रविशति सएव चौरार्पणादिकं कर्यात्। पदात्वनेकग्रामसमध्ये क्रोशमात्राद्बहिः प्रदे
शे घातितो मुषितो वा चौरपदं चजनसंमर्दादिना चग्नंतदापंचानां ग्रामाणां समोहारः पंचग्रामादशग्रामसमाहारो वा दघात्वि
कल्पवचनं तु यथा प्रत्यासत्यपहृतधनप्रत्यर्पणादिकं कुर्यादित्येवमर्थं। यदात्वनेतापहृतं धनं दापयितुं न शक्नोति तदा स्वके
शादेवराजा दघात्। चौरहृतमविद्यत्यपयास्थानं गमयेत्स्वकोशाद्वा दिति गौतमस्मरणात्। मुषितामुषितसंदेहे मानुषेणवादि
व्येन वा निर्णयकार्यः यदि तस्मिन्दाप्यमाने न वेन्मोषे वा संशयः मुषितं शपथं दाप्यो वंध्यान्निर्वापिदासो ध्यपेदिति वद्भमनुस्मरणा
त्। अपराधविशेषे दंडविशेषमाह। वेदिग्राहास्तथा वाडिकुंजराणां च हारिणः। पुरसह्यघातिनश्चैव मूला नारोपयेन्नरान्। वेदि
ग्राहा दान्वलावल्लेन घातकांश्च नरांवूला नारोपयेत्। अपंचवधप्रकारविशेषोपदेशः। अन्यगारापुधागारदेवतागारभेदवा
न्। हस्त्यश्वरथहर्दंश्च हन्यादेवा विचारयन्निति। मनुस्मरणात्। किंच। उत्सेपग्रंथिभेदाच करसंदंशहानिकौ। कार्यौ द्वितीयापराधेक
रपादैकहानिकौ। वस्त्राधकतदिपत्यपहरतीत्यक्षेपः। वस्त्रादिवद्रत्नसुवर्णादिकं चित्स्वस्यात्कृत्यवापहरति। असौ ग्रंथिभेदकः तौ यथा
क्रमं करेण संदंशसदृशेन तद्भुन्यंगुष्ठेन च हानिकौ कार्यौ। द्वितीयापराधे पुनः करश्च पादश्च करपादं तच्छेदकं च करपादैकं तद्धीनं प

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

योऽस्तौकरपादैकहीनकैकाकार्यैऽङ्गेषुग्रंथिच्छेदपोरेकमेकंकरंपादंचछिंद्यादित्यर्थः एतदप्युत्तमसाहसप्राप्तियोग्यद्रव्यविषयं। तदं
गष्ठेदइत्यत्रोक्तो दंडऽउत्तमसाहसइतिनारदस्मरणात्। रतीयापराधेव धएवातथाचमनुः। अंगुलीग्रंथिच्छेदस्यछेदयेत्प्रथमे
व्यहे द्वितीयेहस्तवरोऽरतीयेवधमर्हतीति। जातिद्रव्यपरिमाणपरिग्रहविनियोगवयःशक्तिगाणदेशकालादीनां दंडगुणत्व
घ्नंचकारणनासानित्यात्प्रति द्रव्यंवक्तुमशक्तेः सामान्येनदंडकल्पनोपायमाह। क्षुद्रमध्यमहाद्रव्यहरणेसारतोदमः देश
कालवयःशक्तिसंवित्यंदंडकर्मणि। क्षुद्राणांमध्यमानामुत्तमानांचद्रव्याणांहरणेसारतामूल्याद्यनुसारतोदंडः कल्पनीय
क्षुद्रादिद्रव्यस्वरूपंचनारदेनोक्तं। मद्गुंडासनषट्वास्थिदारुवर्मचरणादियत्। शमीधान्यंक्षुतान्नंचक्षुद्रंद्रव्यमुदाहृतं। वास
कौशेयवर्जंचगोवर्जंपशवस्तथा। हिरण्यवर्जंलोहंचमध्यंब्राह्मणवाच्यपि हिरण्यरत्नकौशेयस्त्रीपुंगोगजवाजिनः देवब्राह्म
णराज्ञांचद्रव्यंविज्ञेयमुत्तमं त्रिप्रकारंह्यपिद्रव्येष्वौत्सर्गिकः प्रथममध्यमोत्तमसाहसरूपो दंडनियमस्तेनैवदर्शितः साहसे
पएवोक्तस्त्रिषुदंडोमनोषिभिः सएवदंडस्तेपेपित्रिषुद्रव्येष्वनुक्रमादिति। मन्मथेषुमणिक्षौमल्लिकादिषुगोव्यतिरिक्तेषु
चमहिषमेषादिपशुषुब्राह्मणसंबंधिषुचकृतकधान्यादिषुतरतमभावोस्तीत्यक्षुद्रवच्चदंडविशेषाकोक्तयामूल्यादि
सारेण दंडः कल्पनीयः तत्रचदंडकर्मणिदंडकल्पनायांतद्धनुभूतंदेशकालवयःशक्तिसम्यक्चिंतनीयंएतच्छ्रुतामिद्रव्यं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

रिमाणपरिग्रहादानामुपलक्षणं। तथा अष्टापाद्यं स्तेपकिल्बिषं शूद्रस्य द्विगुणं त्रराणि इतरेषां पुनिवर्णविदुषोतिक्रमे दं
डन्यूपस्त्वमिति। अयमर्थः किल्बिषशब्देन त्र दंडोलक्षते पास्मिन्नपहारे यो दंडः सविहक्षुद्रादिकरकेऽपहारे अष्टगु
णं आपादनीयः यस्माद्विद्वक्षुद्रादिकरकेऽपहारे दंडन्यूयस्त्वं। मनुनाप्यपमेवार्थो दर्शितः अष्टापाद्यं तु शूद्रस्य स्तेपे भवति
किल्बिषं। षोडशैव तु वैश्यस्य। द्वात्रिंशत् क्षत्रियस्य च ब्राह्मणस्य च तः षष्टिपूर्णं वापि शतं भवेत्। द्विगुणं वा चतुः षष्टिस्तद्
वद्गुणं वेदिनः इति तथा परिमाणकृतमपि दंडगुरुत्वं दृश्यते। यथाह मनुः। धान्यं दशभ्यः कुंभेभ्यो हरतोप्यधिके वधः शेषेष्व
कादशगुणं दाप्यस्तस्य च तद्धनमिति विंशतिद्राणकुंभः हरहियमाणस्वामिगुणापेक्षया सुभिक्षदुर्भिक्षकालापेक्षया
वाताडनांगछेदनवधरूपा दंडा योज्याः तथा सख्याविशेषादपि दंडविशेषः। अदिषु सर्वाणि रजतादीनामुत्तमानां च वासस्
रत्नानां चैव सर्वेषां शतादभ्यधिके वधः पंचाशतस्त्वभ्यधिके हस्तच्छेदनमिष्यते शेषेष्वेकादशगुणं मूल्याद्दंडप्रकल्पव
दिति तथा द्रव्यविशेषादपि पुरुषाणां कुलीनानां नारीणां च विशेषतः। रत्नानां चैव सर्वेषां हरणे वधमर्हति अकुलीनानां
तु दंडातरापुरुषं हरतो दंडः उत्तमसाहसः अपहारे तु सर्वस्वं कन्यां तु हरतो वधः इति। क्षुद्रद्रव्याणां तु माषान्मूलमू
ल्यात्यंचगुणो दंडः। काष्ठभांडतृणदानामन्नमयानां तथैव च। वेणुवैणवचाडानां तथोरसाद्यास्तु चर्मणां। शाकानामादी

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मूलानांहरणेफलमूलयोः।गोरसेक्षुविकाराणांतयाक्षवाणतैलयोः।पक्वान्नानांकृतान्नानांमत्स्यानामामिषस्यच।सर्वेषामल्यमू
ल्यानांमूल्यात्पंचगुणोदमइतिनारदस्मरणात्।यःपुनःप्रथमसाहसःक्षुद्रद्रव्येषुशतावरःपंचशतपर्यंतासीमाषमूल्यतदधिकमू
ल्येचयथायोग्यंव्यवस्थापनीयः।यत्पुनर्मानवंक्षुद्रद्रव्यगोचरंवचनंतन्मूल्याद्द्विगुणोदमइतितदल्पप्रयोजनरागादिविषयंतथाप
राधगुरुत्वादपिदंडगुरुत्वं।यथा।संधिंछित्वातुपेचौर्यंरात्रौकुर्वंतितस्करः।तेषांछित्वाक्षयोहस्तौतीक्ष्णमूलेनिवेशयेदित्येवंस
र्वेषामानंत्यात्प्रतिद्रव्यंवक्तुमशक्तोऽतिपरमाणुदिक्निःकारणोदंडिगुरुलघुभावःकल्पनीयः।पथिकानांपुनरल्यापहारेनदंडः
यथाहमनुः।द्विजोध्वजःक्षणवत्रिर्द्धाविक्षुद्रधमूलकेआददानःपरक्षेत्रोद्दंडंदातुमर्हति।तथा।चाणक्यः।हिंगोधूमयव
नामुद्गमाषयोः।अनिरिवदेयंदातव्यामुष्टेकःपथिस्थितैः।तथैवसप्तमेचक्रेचक्रयानिषेडनभ्रता।अश्वस्तेनविधानेनहर्तव्यंहर
हर्तेकर्मणइति।अचोरस्यापिचोरोपकारिणोदंडमाह।चक्रावकाशाग्न्युदकमंत्रोपकरणव्ययानादत्वाचोरस्यवाहंतुर्जानते
दमउत्तमः।चक्रमयानं।अवकाशोनिवासस्थानं।अग्निश्चोरस्यशरीरादिपनोदार्थः।उदकंरक्षितस्यमंत्रश्चौर्यप्रकारोपदेशः।उ
पकरणंचौर्यसाधनं।व्ययःअपहारार्थंदेशांतरंगच्छतःपाथेयं।एतानिचोरस्यहंतुर्वादद्यत्वेजनब्नापिपःप्रपच्छतितस्योत्तमसाह
सादंडःचौरोपेक्षणेमपिदोषः।शक्तोश्चपनुपेक्षंतेतेपितदोषभागिनइतिनारदस्मरणात्।किंच।शस्त्रावपातेगर्तस्यपातनेचोत्त

153

॥२५३॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मोदमः उत्तमोवा ऽधमोवापिपुरुषस्त्रीप्रमापणे। परगात्रेषुशस्त्रस्यावपातनेदासीब्राह्मणगर्भेव्यतिरेकेणगर्भस्यपातनेचो
त्तमोदमः। दासीगर्भनिपातनेतुदासीगर्भविनाशाल्लुदित्यादेनाशनदंडोनिहितः ब्राह्मणगर्भेतुहत्वागर्भमविज्ञातमित्यत्रवल
हत्यातिदेशंवक्ष्यति। पुरुषस्यस्त्रियिश्चप्रमापणेशीलवत्ताद्यपेक्षयोत्तमोवाधमोवादंडोव्यवस्थितोवेदितव्यः अपिचपदुष्टाः स्त्री
पंचैवपुरुषघ्नीमगर्भिणी। सेतुभेदकरंवासुशिलावध्वापुवेशयेत्विशेषेणादुष्टाविपुष्टाभ्रूणघ्नास्वगर्भपातिनीच। पाचपु
रुषहंत्री। सेतुभोजनीच। एतागर्भरहितास्त्रीगलेशिलांवध्वाअप्सुप्रवेशयेत्। यथानप्लवेत। किंच। विप्राग्निदंपतिगुरुनिद्रापे
त्यप्रमापणे। विकर्णकरनासोष्ठंकृत्वागोभिः। प्रमापयेत्। अगर्भिणीमित्यनुवर्तते। पापरवधार्थमन्नपानादिषुविषंदद
ति क्षिपतियाचदाहार्थंग्रामादिष्वग्निंतयाचपाचनिद्रापतिगुर्वपत्यानिमारयतितौ। छिन्नकर्णकरनासोष्ठंकृत्वाअर्दैतेर्दुष्टव
त्तावर्दैः प्रवाद्यमारयेत्। स्तेयप्रकरणेयदेतत्साहसिकस्यदंडविधानंतत्प्रासंगिकमितिमंतव्यं। अविज्ञातकर्तृकेहननेहंत्र
ज्ञानोपायमाह। अविज्ञातहतस्यगत्युकलहंसुतवांधवा। पृच्छ्यायोवितश्चास्यपरपुंसिरताःप्रथक्। अविज्ञातपुरुषेणघा
तितस्यसंबंधिनिःसुताःपृत्याशन्नाश्चवांधवाः केनास्यकलहोजातइतिकलहमासुपृच्छ्यात्। तथामृतस्यसंबंधिन्यापोवि
तोयाश्चपरपुंसिरताव्यभिचारिण्यः ताअपिपृच्छ्याः कथंपृच्छ्याइत्याह॥ स्त्रीद्रव्यवर्त्तिकामोवाकेनवायंगतः सह। मृतःदेशसम
सद्भंएष्टुपिडानंशनैः किमयंस्त्रीकामोवाद्रव्यकामोवाष्टिकामोवातेनकार्यंकिंसंबंधिन्यावा। स्त्रियामस्यानिरतिरासात्केस्मि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

न्वादव्येप्रीतिः कुतोवावत्रिकामः केनवासह देवंगतरगतइतिनानाप्रकारंव्यभिचारिणीपोषितः प्रथक्प्रथकाविश्वास्यपुरुष्याः त
थामरणादेशनिकटावर्त्तिनोगोपालकाद्याषेजनास्तेपिविश्वासपूर्वंपृष्टव्याः। एवंनानाप्रकारैः पुरुषैर्हंतारंनिश्चित्यतदचितादंडविधात
व्यः किंच। क्षेत्रवेश्मवनग्रामविवीतखलदाहकाः। राजपत्न्यभिगामीचदग्धमस्तकाराजिनः। क्षेत्रंपक्वफलसस्यापेतंवेश्मगृहंवनम
दवाक्रीडावनंवाग्रामवा। विवीतमुक्तलक्षणंखलंवापेदहंतिएषांराजपत्नीमभिगच्छतितासर्वान्कैवीराणामपेर्वेरूपत्वादाहयेत्।
क्षेत्रादिदाहकानामारणादंडप्रसंगादंडविधानं॥ ॥ इति स्तेयप्रकरणं॥ स्त्रीसंग्रहणरूपंविवादपदंव्याख्यायते। प्रथमसाहसादि
दंडप्राप्त्यर्थंत्रेधातल्लक्षणंव्यासेनविवृतं। त्रिविधंतत्समाख्यातंप्रथमंमध्यमोत्तमं। स्त्रीदेशकालसंभाषानिर्धनेचपरस्त्रिया
कटाक्षोवेक्षसंहास्यंप्रथमंसाहसंस्मृतं। प्रमाणंगंधमाल्यानांधूमभूषणचापसां। पुष्पोत्तनंचान्नपानैर्मध्यमंसमुदाहृतं।
सहासनंविविक्तेलुपरस्परमपाश्रया। केशाकेशिग्रहश्चैवसमक्षंसंग्रहणंस्मृतं। स्त्रीपुंसयोर्मिथुनीभावः संग्रहणं। संग्रह
णंज्ञानपूर्वकत्वात्कर्तुर्दंडविधानस्यतत्रज्ञानोपायंतावदाहपुमात्संग्रहणंग्राह्यः केशाकेशिपरस्त्रियाः सद्यावाकामजोश्चिन्हैः पु
त्रिपत्रौद्वयोस्तया। संग्रहणंप्रवृत्तःपुमान्केशाकेशपादिभिर्लिंगैर्ज्ञात्वागृहीतव्यः। परस्याकेशग्रहणंपूर्विकाक्रीडाकेशाकेशि
तत्रतेनेदमितिसरूपइतिवन्हवृ॥ हासतिइक्कर्मव्यतिहारइतिसमासांतइच्युत्पत्तेः। अच्यपत्वाच्चलुप्तात्तीयाविभक्तिः त
तश्चापमार्थः परस्त्रीयासहकेशाकेशीक्रीडनेनाभिन्नवैः करसहदशनादिकृतवणैरागक्तैर्लिंगैर्द्वयोः संप्रतिपत्त्यावा



CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ज्ञात्वासंहरग्रहणेप्रवृत्तोग्रहीतव्यः परस्त्रीग्रहणेनिषुक्तावरुद्धादिव्युदासार्थं किंच। नावीस्तनप्रावरणसक्तिकेशावमर्शनं।
न्प्रदेशकालसंभाषसहैकस्थानमेवच। यः पुनः परदारपरिधानगेयदेशकुचप्रावरणजघनमूर्द्धयेहादिस्पर्शनंसाभिलाष
इवाचरति। तथादेशेनिर्जनेजनताकालेवांधकाराकालेसंलापनंकौतिपरनार्यावासहैकसहैकमंचकादौरिरंसयै
वावतिष्ठतेसोपिसंग्रहणेप्रवृत्तोग्राह्यः एतत्स्वरीहामानदोषपरपुरुषविषयेरतस्यतुनदोषः। यथामनुः। पस्त्वानाहा
रितिः पूर्वमभिभाषेतकारणान्तरानदोषंप्राप्नुयात्कैविन्नाहितस्यव्यतिक्रमइतिपः परिस्त्रियास्यष्टः दमतेऽयसावपिग्राह्य
इतितेनैवोक्तं। स्त्रियंस्यरोददेशेयः स्यष्टोवामर्चयेत्तथापरस्परस्यानुमतेसंर्षसंग्रहणंस्मृतमिति। पश्चमपेयंविदग्धाद्यस
क्तेदुमितिचतेतिस्लाघयाचतुरंगडनसमदंरव्ययत्यसावपिग्राह्यइति। तेनैवोक्तं। दर्पहापदिवामोहाच्छ्रद्धयावास्वपंव
देतापूर्वमपेयंक्रमेतितच्छसंग्रहणंस्मृतमिति। प्रतिषेद्धयोः स्त्रीपुंसयोः पुनः संलापादिकरणेदंडमाह॥ स्त्रीनिषेधेरतं
दद्याद्द्विशतंतुदमंपुयात्। प्रतिषेधेचतर्पादंडोयथासंग्रहणेतथा। प्रतिषिध्यतिइतिप्रतिषेध्यः पतिपत्रादिनिर्धनसह
संभाषणादिकंनिषिद्धंतत्रप्रवर्त्तमानास्त्रीशतपणंदंडंदद्यात्। पुरुषपुनरेवंनिषिद्धेप्रवर्त्तमाने। द्विशतंदद्यात्। द्वयोरुक्त
स्त्रीपुंसयोः प्रतिषिद्धेप्रवर्त्तमानयोः संग्रहेसंभोगेवर्णानुसारेणैषोदंडोवक्ष्यतेसएवंविज्ञेयएतच्चद्वारणादिनार्यावि



CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तिरेकेण। नैवचारणदारेषु विधिर्नीत्यापदा विधु। सद्भुयांतिहितेनारनिर्गृह्णाश्चारयंतिचेतिमनुस्मरणात्। विवादमिद्
नंसंग्रहणेदंडमाह॥ स्वजातावुत्तमादंडआनुलोम्यतुमध्यमः। प्रतिलोम्येवधःपुंसोनार्याःकामादिकर्मनं। वतुर्णामपिवर्णा
नांवलात्करणासजातीपगुप्तपरदारागमनेसाशीतिपणासहस्रंदंडनीयः पदात्वानुलोम्येनागुप्तंहनवर्णास्त्रिमन्निगछ
तितदामध्यमेसाहस्रंदंडनीयः पदापुनःसवर्णामगुप्तामानुलोम्येनवागुप्तांवृजातितदामानवेविशेषउक्तः सहस्रंब्रा
ह्मणेदंडोगुप्तांविप्रांवलाद्दुडान्शतानिपंचदंडाःस्यादिच्छयासाहसंगतः। तथाः सहस्रंवाह्मणेदंडं दाप्योगुप्तेतुतेवज
न्शूद्रायादस्त्रिपवैशोः सहस्रंतुभवेदमइतिएतद्गुरुसखिभार्याव्यतिरेकेणद्रव्यं। माताभ्रातृस्वसाश्वश्रूर्मातुला
नापिरस्वसा। पितृव्यसखिशिष्यस्त्रीभगनीतत्सखीस्तुषा। दुहिताचार्यभार्याचसगोत्राशरणागता। राज्ञीप्रव्रजिता
धात्रीसाध्वीवर्णोत्तमाचपा। एसामन्यतमांधाष्ठनगुरुतल्पगउच्यते। शिश्नस्योत्कर्तनात्रत्र। नाद्रोदंडोविधीयतइ
तिनारदस्मरणात्प्रतिलोम्येउत्कृष्टवर्णस्त्रीगमने क्षत्रियादेःपुरुषस्यवधः। एताश्चगुप्तविषयमन्यत्रतुधनेदंडः
उक्तावपिहितावेववाह्मणगुप्तपासह। विश्रुतौशूद्रवदंडौदग्धव्योवकराग्निनावाह्मणपदागुप्तांतुसेवेतांवैश्यप
थिवौ। वैश्यंपंचशतंकुर्यात्क्षत्रियंतुसहस्रेण। मितिस्मरणात्। शूद्रस्यपुनरगुप्तामुत्कृष्टवर्णस्त्रियोवृजातोलिंगंछे



CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

दनसर्वस्वापहारो। गुप्तांतु ब्राह्मणस्तस्यवधसर्वस्वापहारावितितेनैवोक्तं। शूद्रोगुप्तमगुप्तंवाद्विजातवर्णवासन्। अगुप्तेकांग
सर्वस्वंगुप्तेसर्वंगृहीयतइति। नार्यः पुनर्हीनवर्णस्वदंत्याः कस्यचिः आदिग्रहणान्नसादेश्चकर्तनं। आनुलोम्येत्रवास
वर्णेवाचदंत्याः दंडकल्पः अपंचवधोऽपदेशोशक्तएवतस्यैवपालनाद्धिक्कारात्। नहिजातिमात्रस्याब्रह्मणः परादार्य
मपिशस्त्रेनाददीतेतिशस्त्रग्रहणनिषेधात्यदातुराज्ञानिवेदनकालविलंबनेनकार्यीतियाताशंकातदास्वपमेवजारदीन
हत्यातशस्त्रंद्विजातिभिर्ग्राह्यंधर्मोपत्रोपरुध्यते। तथा। नातताविवचेदोषोहंतुर्भवतिकश्चन। प्रकाशंवाप्रकाशंवामन्यु
स्तंन्यमरछतीतिशस्त्रग्रहाच्च्युनुज्ञानाद्य। तथा। क्षत्रियवैश्यपारन्पोन्यस्त्रिगमनेयथाक्रमंसहस्रंवाशतात्मकोदंडं
वेदितव्यः। तदाहमनुः वैश्यश्चेक्षत्रियांगुप्तांवैश्यांवाक्षत्रियोव्रजेत्। योब्रह्मण्यामगुप्तायांतावुभौदंडमर्हतइति। परदारप्र
संगात्कन्यापामपिदंडमाह। अलंकृतांहरेत्कन्यामुत्तमंह्यन्यथाधमं। दंडदघोत्मवर्णासुप्रातिलोम्येवधः स्मृतः विवा
हानिमुदग्नीचूतामलंकृतांसवर्णांकन्यामाहरन्नुत्तमसाहसंदंडनीयः। तदनन्निमुखासवर्णांहरन्प्रथमसाहसं
उक्तवर्णजांकन्यामपहरतःपुनः क्षत्रियादेर्वधएववादंडविधानाच्चापहर्तुः सकाशादाछिद्यान्यस्मैदेयेतिगम्यते।
आनुलोम्येपहरणेदंडमाह। सकामास्वनुलोमासुनदोषस्त्वन्यथादमः परिसानुरागाहीनवर्णांकन्यामपहरतित
दादोषाच्चावान्नदंडः। अन्यथात्वनिछंतीमपहरतः। प्रथमसाहसोदंडः। कन्यादूषणेदंडमाह। दूषणेनुकरेछदंडत्र

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मायांवधस्तया। अनुलोमाप्रतिलोमानुवर्त्तते। यद्यमांकन्यावलात्कारेणनरवक्षतादिताद्दूषयतितदातस्यकरश्छेत्तव्यः य
दापुनस्तामेवांगुलिप्रक्षेपेणयोनिक्षतंकुर्वन्नदूषयतितदामनूक्तंषट्शतंहितांगुलिछेदं अभिषह्यतुपः। कन्याकुर्यादर्थे
णमानवः। तस्याभुक्तेंदंगुल्यादंडवाहितिषट्शतमिति। यदापुनः सानुरागंपूर्ववद्दूषयतितदापितैनैवविशेषोक्तः स
कामाद्दूषयान्नस्तेनांगुल्याछेदमर्हति। द्विशतंतुदमंदद्यात्प्रसंगविनिवृत्तपदेतिपदापुनः कन्यैवकन्यांदूषयतिविद
स्थावातेत्रापिविशेषस्तेनैवोक्तः। कन्यैवकन्यांयापाकुर्यात्तस्यास्तद्द्विशतोदमः। यातुकन्यांप्रकुर्यात्स्त्रासासंघोमांडम
र्हति। अंगुल्योरेवचछेदंवरेणाद्दूहनंतथेतिकन्यांकुर्यादितिकन्यांयोनिक्षतवतींकुर्यादित्यर्थः। यदापुनस्तुक्षत्रियाती
यांकन्यामविशेषात्सानुरागामकामांवागच्छतितदाहीनस्यक्षत्रियादेर्वधः उत्तमांसेवमानस्तुजघन्योवधमर्हती॥१५६॥
तिमनुस्मरणात्। यदासवर्णासकामामाभिगच्छति। तदागुदकुंगोभियुनंतत्पित्रेदद्यात्। भुक्तोयदाछतिपितिरतु॥१५६॥
क्तमानिच्छतिदंडरूपेणतदेवराज्ञेदद्यात्। सवर्णांकामांगच्छतोवधएव। यथाहमनुः भुक्तंदद्यात्सेवमानः समा
मिच्छेत्पितायदियाकामाद्दूषयेत्कन्यांससंघोवधमर्हतिसकामांदूषयंस्तुल्यावधंप्राप्नुयान्नरइतिकिंच।
शतंस्त्रीदूषणेदद्याद्द्वितुमिथ्याभिशंसिता। पश्चुंगच्छन्शतंदाप्योहीनस्त्रीगांचमध्यमस्त्रीशब्देनात्रप्रकृतस्त्र

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

न्कन्यावमश्रपतेतस्यांपदिकश्चिद्विद्यमानानेवापसारराजापकर्षादिदीर्घकुत्सितरोगसंस्पर्शमैथुनात्वादिदोषान्युक्त
श्यदयमकन्येति दूषयति अस्यैशतंदाप्यः मिथ्याभिशंसनेपुनरविद्यमानदोषाविष्करणे द्वेशते दापनीयः गोव्यतिरि
क्तपशुगमनेतुशतंदाप्यः यःपुनः हीनोस्त्रियमंत्यावसायिनीमविशेषात्सकामामकामांवगांवाभिगच्छति अस्यैमध्य
मसाहसदंडनीयः। साधारणस्त्रीगमनेदंडमाह। अवरुद्धासुदासीषुचुडिव्यासुतथैवचागम्यास्वपिपुमान्दाप्यः
पंचाशत्पणिकंदमं। गच्छन्नित्यनुवर्तते। ऊनलक्षणवर्णास्त्रियोदास्यस्ता। एवस्वामिनाभुक्तत्वाहानिव्युदासार्थत
हएवस्वीकार्यमित्येवंपुरुषांतरायत्रागतानिरुद्धाअवरुद्धापुरुषनियतपरिग्रहाचुडिव्याः पदीदासोऽवरुद्धाचुडि
व्यावा न वेपुरुस्तदातासुतथावशाद्वेश्यापैरिणीतामपिसोधशरणस्त्रीणांचुडिव्याणांगृहणंतासुचसर्वासुपुरुषसाधा
रणतयागम्यास्वपिगच्छन्पंचाशत्पणंदंडनीयः परपरिगृहीतत्वेनतासांपरदारतुल्यत्वात्। रातच्छस्यष्टमुक्तंनारदेन।
स्वैरिणीपरावरुद्धाणवेश्यादासीनिष्कासिनीचपः गम्याः स्युरानुलोम्यनस्त्रियोनप्रीतिमतः। अस्वेतुचुडिव्यासुद
यः स्यात्परदारवत्। गम्यास्वपिहितोपेपाधतस्ताः सपरिग्रहाइति। निष्कासिनीस्वाम्यनवरुद्धादासी। ननुस्वैरिणीपादानं
साधारणतयागम्यत्वाभिधानमयुक्तंनहिजातितः शास्त्रंतोवाकाश्चिल्लोकेसाधारणास्त्रियउपलभ्यंतेतथाहिस्वै
रिणीदासस्यश्चतावद्दूर्लभास्त्रियएव। स्वैरिणीपापतिंहित्वासवर्णंकामतः श्वपेत्सवर्णानामानुलोम्येनदास्यंनप्रीति

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

लोमइतिमनुस्मरणात्। नचवर्णस्त्रीणांपत्योजीवतिमृतेवापुरुषांतरोपभोगोघटते। दुःशीलःकामवृत्तोवागुणै
र्वापरिवर्जितः। परिचर्यःस्त्रियासाध्वीसततंदेववत्पतिः कामतुक्षपयेद्देहंपुष्पमूलफलैस्तुभः। नतुनामापिगृह्णीया
त्पत्यौप्रेतेपरस्यत्विति निषेधस्मरणात्। नापिकन्यावस्थायांसाधारणत्वेपित्रादिपरिरक्षितायाःकन्यायाएवदानाप
देशात्। दाजभावेपितथाविधायाएवस्वपरोपदेशात्। नचदासीभावात्स्वधर्मोधिकारच्युतिः पारतंत्र्यंहिदास्यं न
स्वधर्मपरित्यागः। नापिवेश्यासाधारणीवर्णानुलोमजाव्यतिरेकेणगम्यजात्यंतरासंभवात्। तदंतःपातित्वेच
पूर्ववदेवागम्यत्वंप्रतिलोमजत्वेतुतासांनितरामगम्यत्वंअतःपुरुषांतरोपभोगेतासांनिंदितकर्मभ्यासे
नपातित्यात्पतितसंसर्गस्यवानिषिद्धत्वान्नस्फलपुरुषोपभोगयोग्यत्वं। सत्वंमेवंकिंतुअत्रस्वैरिण्या
घ्रपभोगोपिनादिरस्तुराजदंडभयादिदृष्टदोषभावाद्गम्यत्ववावोपपत्तिः। दंडाभावश्चावरुद्धस्त्रीसाक्षि
तिनियतपुरुषपरिग्रहोपाधितोदंडविधानात्तदुपाधिरहितास्वयोगदम्यातेस्वैरिण्यादीनांपुनर्दंडाभावोपिविधानाभावात्क
न्यानजंतीमुक्तस्त्रीनकिंचिदपिदापयेदितिलिंगदर्शनाभावावगम्यते। प्रायश्चित्तंतुस्वधर्मसर्वलनानिमित्तंगम्यानांगर्हणाचाविशे
षादुक्तत्वात्। यत्पुनर्वेश्यानांजात्यंतरासंभवेनचसंगतः पातित्वमनुमोनादुक्तंवेश्यावर्णानुलोमाद्यतः पातित्वेमनुष्यजात्यास्त्र
यत्वाद्ब्राह्मणजातिवदिति। तन्नकुंडगोलकादिभिरनेकांतिकत्वात्। अतोवेश्यारक्षाकाविजातिरनादिर्वेश्यायामुत्पद्यजाते

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

समानजातेर्वापुरुषादुत्पन्नापुरुषसंभोगव्यतिरेकेणपतिब्राह्मणादिवल्लोकप्रसिद्धिवसादन्यत्रपगमनापंनचनिर्मूलयंप्रसिद्धः स्म
र्यतेतथा। त्वंदपुराणेपंचचूडानामकाश्चनाशरसस्तासितातिर्वेश्यारव्यापंचमीजातिरितिअतस्तासांनिपतपुरुषपरिणय्य
नविधिविधरतपास्मानोक्तेजातिपुरुषान्निगमनेनादृष्टदोषानापिदंडस्तासुचानवरुद्धात्मगछतांपुरुषाणांपद्यपि
नदंडस्तथाप्यदृष्टदोषास्सेचस्वदारनियतःसदेतिनियमात्पश्चुवेश्यान्निगमनेप्राजापत्यंविधायतइतिप्रायश्चित्तस्मरणा
धेतिनिरवद्यंअवरुद्धसुदासीत्वित्यनेनदासीस्वैरिण्यादिभुजिष्यागमनेदंडविधानान्नस्वभुजिष्यासुदंडोनास्तीत्यथो
दुक्तेतस्यापवादमाह। प्रसह्यदास्यन्निगमेदंडोदशपणःस्मृतः। वहनापद्यकामासेचतुर्विंशतिकःपुनः। पुरुषसंभोगडा
विकासुदासीस्वैरिण्यादिषुशुल्कदानविरहेणप्रसह्यबलात्कारेणान्निगछतोदशपणोदंडःपदिवहवएकामनिछंतावत
त्कारेणान्निगछतितर्हिप्रत्येकंचतुर्विंशतिपणांपरिमितंदंडनायःपदापनस्तदिछयाचाडिंदत्वापश्चादनिछंतापमिव
लाहुडातितदातेसमपिनदोषःपदिव्याध्यावाप्रेनवस्तस्यानस्यात्। व्याधितासम्रमाव्यगारोडाकर्मपरायणाआमंत्रिता
चेन्नागछेददंडआवडवास्मृतेतिनारदवचनात्। गृहीतवेतनावेश्यानिछंताद्विगुणंवहेत्। अगृहीतेसमंदाप्यःपुमानप्ये
वमेवहि। पदातुशुल्कंगृहीत्वाणप्यस्त्रीस्वस्थापिपदिनछतितदाशुल्कंद्विगुणंदद्यात्। तथाशुल्कंदत्वा स्वस्थस्यपुरुषस्यस्व
पमनिछतःशुल्कंहानिरेव। शुल्कंगृहीत्वापाणप्यस्त्रीनेछंताद्विगुणंवहेत्। अनिछन्नदत्तशुल्कापिशुल्कंहानिमवाप्नुयादिति

CC-0.Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तेनैवोक्तं। तथान्यापिविशेषस्तेनैव दर्शितः अपुत्रयछंस्तथा मुल्कमनुक्त्वा पुमान् स्त्रियं। आक्रमेण चसंगच्छन्घातदंतनखादि
भिः अपोनोवापिगृह्णीयाद्वहन्निर्वापिवासयेत्। मुल्कमष्टगुणंदाप्यो विनयंतावदेवतु वेश्याः प्रधानायास्तत्र कामुकास्त
द्गृहोषिताः तत्समुच्छेषुकार्येषु निर्मुच्यंसंशयेविदुरिति। किंच। अथोनागच्छतोयेषांपुरुषंवाभिमेहतः चतुर्विंशतिकोदंड
स्तथाप्रवृजितागमयस्तस्वेछयायेषांमुखादावभिगच्छतिपुरुषंवाभिमुखंमेहतितथाप्रवृजितावागच्छतितदाचतुर्वि
शतिपणान्दंडनीयः अग्र्याभिगमनेत्वाकुकवंधेनप्रकाशयेत्शूद्रस्त्वधात्पएवस्यादंत्यस्यापीनमेवध्यः अंत्याचांडा
लतद्गमनेत्रैवार्षिकान्प्रायश्चित्तानभिमुखानसहस्रेत्वंत्पज्ञास्त्रियंइतिमनुवचनात्पणसहस्रंदंडयित्वाकुवंधेन
कुत्सितवंधेनभगाकरेणंकृत्वाखराद्रन्निर्वासयेत्। प्रायश्चित्तामिमुखस्यपुनर्दंडमेवा शूद्रः पुनश्चंडालीयभिग
मनेत्यएवचंडालएवभवति। अंत्पज्ञास्यपुनश्चंडालादेरुत्कृष्टजातिस्त्र्यभिगमनेवध्यएव॥ ॥इतिस्त्रीसंग्रहपुक
रणं॥ व्यवहारप्रकरणमध्येस्त्रीपुंसयोर्गौरव्यमप्यपरंविवादपदंमनुनारदाभ्यांविवृतोतत्रनारदः विवाहादिभि
र्धिः स्त्रीणांपत्रपुंसांचकार्त्यंति। स्त्रीपुंसयोगसंज्ञंतद्विवादपदंमुच्यतेइतिमनुरप्याह। अस्यतंत्रास्त्रियः कार्याः पुरुषैः स्वै
र्दिवानिशं। विषयेषुचसज्जंत्यः संस्थाप्याह्यात्मनोवशादिति। यद्यपिस्त्रीपुंसयोः परस्परं अर्थिप्रत्यर्थितयान्यूनपशमदमं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

व्यवहारोनिर्विशिष्टस्तथापिप्रत्येकेसएकएपरपरयावाविदितेतथापरस्परातिचारेदंडादिनादंपतानिनधर्मवर्गेराज्ञारक्षाप
नौनौ। इतिरथादोषभाग्भवतातिव्यवहारप्रकारएराज्ञधर्मम्ध्येद्यस्यस्थापुंसजातस्योपदेशः एतच्चविवाहप्रकरणएवसप्र
पंचप्रतिपादितमितिजोगीस्वरेणनपुनरत्रोक्तं॥ संप्रतंप्रकीर्णकाख्यंव्यवहारपदंप्रस्तूयते। तत्लक्षणंचकथितंनारदेन॥ प्रकी
र्णकेषुविज्ञेयाव्यवहारान्यपाश्रयाः राज्ञामाज्ञाप्रतीपातस्तत्कर्मकरणंतथा। गुरुप्रदानेसंभेदः प्रकृतानांतथैवच। पाषंडिनै
गमश्रेणिगणधर्मविपर्यापितापुत्रविवादश्रुप्रायश्चित्तव्यतिक्रमः प्रतिग्रहविप्लेपश्चकापथ्याश्रमिणामपि। वर्णसंव
रदोषश्चतद्वृत्तिनियमस्तथा। नदृष्टंपश्चपूर्वेषुसर्गेतत्स्याव्यकीर्णकंइति। प्रकीर्णकेविवादपदेपविवादाराज्ञामाज्ञाल
धनतदाज्ञाकरणादिविषयास्तेनपस्तभवायिः नपएवतत्रस्मृत्यावारव्यपेतामार्गेवर्तमानानांप्रतिकूलनोमास्थाप
व्यवहारनिर्णयंकुर्यात्। एवंचवदतापोनप्राश्रयोव्यवहारः तत्प्रकीर्णकमित्यर्थात्लक्षितोभवतितत्रापराधदंडनिर्णे
यमाह॥ जनंवाभ्यधिकंवापिलिखेद्योराजशासनं। पालिखतिपाश्वपरिदारिकंचोरंवागृहीत्वाराज्ञेनर्पयित्वास्वयं
मुंचतितावुभावुत्तमसाहसंदंडनीयौ। प्रसंगान्नरपाश्रयव्यतिरिक्तव्यवहारविषयमपिदंडमाह। अथचसेणिद्विजोहव्यो
दंडउत्तमसाहसं। मध्यमंक्षत्रियंवैश्यंप्रथमंशूद्रमधिकमूत्रपुरीषादीनांभक्षणेनहणेवाक्षणंदूष्यान्नपानादिनि
पारदारिकचोरंवामुंचतोदंडउत्तमः। राज्ञदत्तमेर्निबद्धस्यपरिमाणान्यूनत्वमाधिक्यंवाकाशपन्नराज्ञासासनं॥ ३॥

CC-0 Dharmartha Trust & Kr Art eGangotri-Vaidika Bharata Initiative

अनस्वरूपेणवा दूषयित्वा खादयित्वोत्तमसाहसं दंडो भवति क्षत्रियं पुनरेव दूषयित्वा मध्यमं वैश्यं दूषयित्वा प्रथमं शूद्रं
दूषयित्वा प्रथमसाहसस्यार्धं दंडो भवतीति संबंधलक्षणाद्यत्र दूषणदोषतारतम्यस्य दंडतारतम्यमूहनीयं। किंचाकूट
स्वर्णव्यवहारी विमांसस्य च विक्रयी। अंगहानश्च कर्तव्यो दंडश्चोत्तमसाहसः। रसवेधाद्यापादितवर्णोत्कर्षकूटैः स्वर्णव्य
वहारशीलाः स्वर्णकारादयो विमांसस्य कुत्सितमांसस्य गवादिसंबंधनविक्रयशीलाः। सौनकादिः चशब्दात् कूटरजतादिव्य
वहारी चेते सर्वे प्रत्येकं नासाकर्णकरोद्विचिन्हैरंकैर्हीनाः कार्याः। अशब्दात् अंगच्छेदनं समुच्चितमुत्तमसाहसदंडं दाप्याः। यन्पुन
र्मनुना क्षे सर्वकरकपापिष्टं हेमकारं तु पार्थिवः। प्रवर्तमानमन्यापि छेदयेत्क्षुरवशः क्षुरैरिति तत्रैव ब्राह्मणराजस्वर्णवि
वर्यो विषयविरोधदंडो भावमाह। चतुष्पादकृतो दोषो नापोहति प्रजल्पतः। काष्ठलोहेषुपाषाणवाहुपुगकृतस्तथा। च
तुष्पादैर्गजादिभिः कृतो पादोषामनुष्यमाराणादिनूपो सोगवादिस्वामिनो नानभवत्यपसरेति प्रकर्षेणोच्चैर्भाषमाणस्य
तथा लकुटलोहसापकपाषाणक्षेपणेन वाहनायुग्येन च युगं च हतोऽस्यादिना कृतो यः पूर्वोक्तो दोषः सोपि काष्ठादि
न प्रास्यतो भवति अपसरेति प्रजल्पतः काष्ठादिक्षेपणे नहि सापो दोषो भावकथनं दंडो भावप्रतिपादनार्थं पुनः
तं पुनरबुद्धिपूर्वककरणे निनित्तमस्य वा काष्ठादिग्रहणं च शक्तितामरादिरूपलक्षणार्थं। किंच। छिन्नमनस्पेनयानेरतथ
नलयुगादिना। पश्चाच्चैवापसरता हिंसने स्वामिदोषं भाकेनासिभवारङ्गर्नस्याछिन्नाशकटादियुक्तवलीवर्दनस्यारङ्ग

१५८॥

१५८॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

यो स्त्रिया न्याने न छिन्नानस्यं शकटादिस्तन। अदिग्रहाणां दुग्नाक्षचक्रादिना पानेन पश्चात्स्वतोपसरतो तेन चशब्दात्त्रिपिगव
गच्छता प्रतिमुखं वागच्छता च मनुष्यादि हिंसने स्वामी प्राज्ञको वा न दोषभाग्भवति। यत्तत्पूर्वमज्ञानितत्वाद्धिंसने स्यात
याचमनुः छिन्ननस्ये भग्नपुरीतिर्यक्प्रतिमुखागते। अक्षभंगे च यानस्य चक्रभंगे तथैव च। छेदने चैव पंत्राणां योक्त्र
रश्म्येस्तथैव च। आक्रांदे वाध्यपैहतिनदंडं मनुरब्रवीदिति। अपेक्षायां स्वामिनां दंडमाह। शक्तास्वामी क्षयतस्वामी द
ण्डं भंगिणं तथा। प्रथमं साहसं दंडं कुर्यात्तदिति विकल्पे द्विगुणं तथा। अप्रवीणप्राज्ञकप्रेरितैर्दंडिभिर्निगडादि
भिः भंगिभिर्गवादिभिर्बध्यमानं समर्थं पितृव्यामी प्रथमो क्षन्नुपेक्षते तदा अकुशलप्राज्ञानिकानिपाज्ञननिमित्तं प्रथम
साहसं दंडं दद्यात्। यदा तु मरितो हमिति विकल्पे पिनमोक्षपतितदा द्विगुणं यदा पुनः प्रवीणमेव प्रज्ञकं प्रेरयति तदा प्रा
ज्ञकस्य वदंडो नास्वामी। यथा मनुः प्रज्ञकस्य वदुवेदा प्रो प्राज्ञको दंडमर्हति। प्रज्ञकोपंता आस्त्रिपुत्रः प्रीतिविशेष
चूंदंडविशेषः कल्पनायः। यथा मनुः मनुष्यमोरणे क्षिप्रं चौरवाक्तिल्विषा न वेत्तमाणं चरत्सु महत्स्वार्थे गोगजवृहया
दिषु। क्षुद्रकाणां पशूनां तु हिंसायां द्विशतादमः पंचाशत्तु नवेद्दंडमुन्नेषु ग्रहपक्षिषु। क्षुद्रकाणां पशूनां तु दंडः स्या
त्पंचमाषकः माषकस्तु नवेदंडः प्रभूकरनिपातने इति। किंवा जारं चौरं त्यक्तिवदन्राप्यः पंचशतं दमः। उपजीव्यस्य
नमुंचास्तं देवाश्च गुणाक्षतं। स्वशकलं कृतानां जारं परिहारिणं चौरं निर्छिन्नं त्यक्तिवदन्पंचशतं पणानां पंचशतानि

CC-0. Dharmartha Trust Jaki. Arre Gangotri Vanika Bharata Initiative

यास्मिन्नमेसतथोक्तस्तंदमंदाप्यः पःपुनर्जारहस्ताद्धनमुपजारव्यउत्कोचस्तपेणहा।त्वाजारंमुंचत्यसौयावद्धहीतंताव
द्दशगुणंक्षतंदंडंदाप्यः।किंच।राज्ञोनिष्प्रवक्तारंतस्यैवाक्रोशकंतथा।तन्मंत्रस्यचवक्तारंछित्वाजिह्वांप्रवासये
त्।राज्ञोनिविष्टस्यानमिमतस्यामित्रस्तोत्रादेः प्रकर्षेणचूर्णयोचूर्णावशकारंतस्यैवराज्ञआक्रोशकारिकोनिंदाकर
णशाल्ले।तदीयस्यचमंत्रस्यस्वराष्ट्रवृद्धिहेतोः परराष्ट्रक्षयकरस्यवाक्तारममित्रकर्णेजयंतांजिह्वामुत्कृत्यस्व
राष्ट्रनिष्कासयेत्।कोशापहरणादेपुनर्वधएव।राज्ञःकोशापहर्तृश्चप्रतिकूलेव्यवस्थितान्।घातयेद्विविधैर्द
ण्डैरराणांचोपजावकानितिमनुस्मरणात्।विविधैर्वधसर्वस्वापहारांगछेदवधसंपरिस्पर्धः।सर्वस्वापहारोपिपशू
स्पंजीवनोपकरणंतन्नापहर्तव्यंचौरोपकारिणांविना।यथानारदः आयुधान्यायुधीयानांवाह्यादीन्वाह्यजीवि
नां।वेश्यपाश्चीसणमलंकारान्वाबातोद्यादितद्विदां।पशूपस्योपकरणंयोजनावतिकारवः।स्वर्वस्वहरणेप्येतन्नराज्ञा
हर्तुमर्हतीति।ब्राह्मणस्यपुनर्नशारीरोवाह्मणदंडइतिनिषेधाद्वधस्थानेशिरोमुंडनादिकंकर्तव्यं।ब्राह्मणस्यवध
मौंडंपुरान्निर्वासनंकरे।ललाटेचाग्निशस्तोकःप्रयाणंगर्दभेनात्वितिमनुस्मरणात्।किंच।मृतांगलग्नविक्रेतुर्गु
रोस्तुडमितुस्तथा।राजयानासनारोदुर्दंडउत्तमसाहसः।मृतशरीरसंबंधिनोवस्त्रपुष्पादेर्विक्रेतुर्गुरोः पित्राचा



CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

र्यथोक्तो ऽपि तुस्तथा राज्ञानुमतिं विना तद्यानं छत्रादिकं आसनं सिंहासनं धारोह तश्चौत्तमसाहसो दंडः। किंच॥
द्विजेत्र जेदेदिनो राज्ञो द्विजादेशक्तस्तथा विप्रत्वेन च शूद्रस्य ज्ञापितो ऽशतं दमः यः पुनः क्रोधादिना परुषमित्यनेन ज
ह्यं निनिन्दि। यश्च ऽपेतिः शास्त्रविद्गुर्वादिहितेषु व्यतिरिक्तो राज्ञो द्विजनिष्ठं संवत्सरांते तवराष्ट्रच्युतिर्भवि
ष्यतीत्यादिरूपमादेशकरोति। तथा यः शूद्रो भोजनार्थं पङ्क्तौ पवनादिहरणलिंगानि धारयति तेषामष्टशतो
दमः। अष्टौ शतानि यास्मिन्नन्ते सतथोक्तः श्राद्धभोजनार्थं पुनः शूद्रस्य विप्रवेषधारिणस्तप्तशलाकपापङ्क्ति
पवातवद्दुष्यालिरवेत इति स्मृत्यंतरोक्तं द्रव्यावत्यर्थं तु ब्राह्मणलिंगधारिणो वधएव। द्विजातिलिंगिनः शू
द्रान्घातयेदिति स्मरणात्। रागलोभादिनान्यथा व्यवहारदर्शनेऽमाह॥ दुर्दृशस्तु पुनर्दृष्ट्वा व्यवहारान्न
पेरणतु। सभ्याः सभापतिना दंड्याः विवादाद्द्विगुणं दमं। दुर्दृशान्स्मृतचारप्राप्तधर्मान्क्रोधेन नरागलोभादिभि
रसम्यग्विचारितत्वेनाशंक्यमानान्व्यवहारान्पुनः स्वयं सम्यग्विचार्य निश्चितदोषाः पूर्वसभ्याः ऽपि सहितो प्र
त्येकं विवादयोर्दमः पराजितस्य तद्द्विगुणं दाप्याः अप्राप्ततत्तदंडाधिपरत्वाद्वचनस्य रागलोभादित्यादिक्रमो

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

केनापौनरुक्त्यं पदापुनः साक्षिदोषेण व्यवहारस्य दुर्दृष्टतात्साक्षिण एव दंड्या नडपीनापि सभ्याः पदा
तुराजानुमत्या व्यवहारस्य दुर्दृष्टत्वं तदा सर्व एव राज्ञ सहिताः सभादयो दंडनीयाः पादेगच्छति कर्तारं पादः सा
क्षिणमृच्छति। पादः सभासदः सर्वान्पादो राजानमृच्छतीति वचनात्। एतच्च प्रत्येकं राजादीनां दोषप्रतिपादन
परं न पुनरेकस्यैव पापापूर्वस्य विभागायकर्तृसमवापि फलजनस्वभावत्वादपूर्वस्य। न्यायतो निर्णी
तव्यवहारस्य प्रत्यावर्त्तापि लुदंडमाह। योमन्येताऽजितोस्मीति द्वेनापि पराजितः। तमायातं पुनर्जित्वा
दापयेद्द्विगुणं दमं। यः पुनर्न्यायमार्गेण पराजितोप्यपाकृत्यान्यायेन राजितोस्मीति मन्यते तमायातं कूटत्वे
ख्याप्य पन्यासेन पुनर्धर्माधिकरणमधिष्ठितं तद्धर्मेण पुनः पराजीत्वा द्विगुणं दंडं दापयेत्। नारदेनाप्यु
क्तं। तारं तं चानुशिष्टं च योमन्येत विधर्मतः द्विगुणं दंडमारुह्य यत्तत्पुनरुद्धरेदिति तीरतं साक्षिलेख्या
दिनिर्णीतमनुद्धृतं दंडमनुशिष्टमुद्धृतदंडपर्यंतं नीतमिति यावत्। यत्पुनर्मनुवचनं तीरितं चानुशिष्टं च
यत्र क्वचन विद्यते। कृतं तद्धर्मतो ज्ञेयं न तत्प्राज्ञो निवर्त्तयेदिति तदपि प्रत्यर्थिनोरन्यतरवचनं तीरितं च

॥१६१॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नुशिष्टं चपत्रकं चनविद्यते। कृतंतद्धर्मतोज्ञेयं नतत्प्राज्ञो निवर्त्तयेदिति तदर्थिप्रत्यर्थिनोरन्यतरवचना
द्व्यवहारस्याधर्मतोवृत्तत्वाशंकायांपुनर्हि गुणदंडप्रतिज्ञापूर्वकंव्यवहारं प्रवर्त्तयेत्तनपुनर्धर्मतोवृत्तत्वा
निश्चयेपिराज्ञा तो नादिनाप्रवर्त्तनीयं इत्येवंपरं। पत्युनर्नयोरेणापिन्यायापायेतं कार्यं निर्वर्त्तितं तदायस
म्यक्परीक्षणेन धर्मेपायेस्थापनीयं। न्यायापायेतं पदन्येन राज्ञाज्ञानकृतं नवेत्तदप्यन्यायविहितं पुनर्न्या
येनिवेशयेदितिस्मरणात्। अन्यायगृहीतदंडधनस्यगतिमाह। राज्ञाऽन्यायेनयोदंडोगृहीतोवरणीयतो नि
वेद्य दद्यादिप्रेभ्यः स्वयंत्रिशद्गुणंकृतं। अन्यायेनयोदंडोराज्ञा तो नादिनागृहीतस्तं त्रिंशद्गुणंकृतंवरुणयोद
मितिसंकल्प्यब्राह्मणेभ्यःसमेदद्यात्। यस्माच्छ्रदंडनूपेणापावद्गृहीतमन्यायेन तावत्तस्मैप्रतिदेयं इतरथाऽपहा
रदोषप्रसंगात्। अन्यायदंडग्रहणेपूर्वस्वामिनः स्वत्वविच्छेदभावात्। उत्तमोपपदस्येयं शिष्यस्यकृतिरात्मनः
धर्मशास्त्रस्यविवृतिर्विज्ञानेश्वरयाज्ञनः॥ ॥ इतियाज्ञवल्क्यमुनिशास्त्रगतव्यवहारकांडविवृतिर्विहिता॥
ऋसंमिताक्षरपदगयनामधेरागंभीरवितताथवती॥२॥ गंभीरात्रिः प्रसन्नाभिर्वाग्भिर्नाम्नामिताक्षर
अनल्पार्थारमिरत्यात्रिरतिर्विहतामया॥३॥ इतियाज्ञवल्क्यमुनिशास्त्रगताविवृतिर्नकस्यविहिताविवृ

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

दुःप्रमिताक्षरसपि विपुलार्थवतीपारिषिंचतिश्रवणयोरमृतं॥४॥ गंजीरा निःप्रशस्ता भिर्वाक्तिनाम्नामि
तौ सरा। अनल्पार्थाभिनासीदस्तिन्नविव्यतिक्षितितलकल्याणकल्यंपुरामोहदः सुतएवाक्षितपति
श्रीविक्रमार्कागमः॥ विज्ञानेश्वरपंडितोनन्नडातोकिंचान्यदन्पापमामाकल्यास्थिरमस्तुकल्यत्तनिका
कल्यंतदेतच्चयो॥ इतिप्रकार्सप्रकरणं॥ ७॥ ॥इतिश्रीमत्पद्मनाभन्नहेयाध्यापात्मजस्यश्रीमत्परमहंसप
रिव्राजकविज्ञानेश्वरन्नहारकस्यकृतौ दशजुमिताक्षरापांयाज्ञवल्क्यधर्मशास्त्रविवरणेद्वितीयोध्यायः॥ ॥शुभमस्तु॥
संवत्१७४४शाकाः१६०९लिखितंनयमलपाडेरामपुत्रः॥ लावगल॥ दवेषवेरवाल॥
अस्मिनध्यायेप्रकरणानुक्रमणिका। व्यवहारन्नातकाप्रकरणं॥१॥ प्रतिन्नूप्रकरणं॥२॥ ऋणदानप्रकरणं॥३॥
॥निन्नेपप्रकरणं॥४॥ १॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative